# श्री शुक्रस्तोत्रं

श्रुण्वन्तु मुनयः सर्व्वे
शुक्रस्तोत्रमिदं शुभं
रहस्यं सर्व्वभूतानां
शुक्रप्रीतिकरं शुभं (1)

एषां सङ्कीर्त्तनान् नित्यं
सर्व्वान् कामानवाप्नुयात्
तानि शुक्रस्य नामानि
कथयामि शुभानि च (2)

शुक्रः शुभग्रहः श्रीमान्
वर्षकृत् वर्षविघ्नकृत्
तेजोनिधिर् ज्ञानदाता
योगी योगविदांवरः (3)

दैत्यः सञ्जीवनो धीरो
दैत्य नेत्रो ऽ शना कविः
नीतिकर्त्ताग्रहाधीशो
विश्वात्मा लोकपूजितः (4)

शुक्लमाल्यांबरधरः
श्रीचन्दनसमप्रभः
अक्षमालाधरः काव्यः
तपोमूर्त्तिर् धनप्रदः (5)

चतुर्विंशति नामानि
अष्टोत्तरशतं यथा
देवस्याग्रे विशेषेण
पूजां कृत्वा विधानतः (6)

यः इदं पठतिस्तोत्रं
भार्ग्गवस्य महात्मनः

विषमस्तोपि भगवान
दुष्टस्स्यान्नत्र संशयः (7)

स्तोत्रं भृगोरिदमनन्तगुणप्रदं यो
भक्त्यापठेच्च मनूजो नियतःशुचि सन
प्राप्नोति नित्यमतुलां श्रीयमीप्सितार्त्थान
राज्यं समस्त धनधान्ययुतं समृद्धिं

**श्री शुक्रस्तोत्रं सन्पूर्णं**